लज्जालुः, पुं, स्त्री, (लज्जेवास्त्या अस्तीत्यर्थे आलुः ।) क्षुपविशेषः । तत्पर्य्यायः । रक्तपादी २ शमीपत्रा ३ स्पृक्का ४ खदिरपत्रिका ५ सङ्कोचिनी ६ समङ्गा ७ नमस्कारी ८ प्रसारिणी ९ सप्तपर्णी १० खदिरी ११ गण्डमालिका १२ लज्जा १३ लज्जिरी १४ सर्पलज्जा १५ असरोधिनी १६ रक्तमूला १७ ताम्रमूला १८ स्वगुप्ता १९ अञ्जलिकारिका २० । इति राजनिर्घण्टः ॥ महाभीता २१ वशिनी २२ महौषधिः २३ । इति शब्दचन्द्रिका ॥ अस्या गुणाः । कटुत्वम् । शीतत्वम् । पित्तातिसारशोफदाहश्रमश्वासव्रणकुष्ठ-कफास्रनाशित्वञ्च ॥ तद्भेदो यथा,—

"लज्जालुर्विपरीताख्या अल्पक्षुपश्छदबहुला ।
वैपरीत्या च लज्जालुर्नाभिधाने प्रयोजयेत् ॥
लज्जालुर्वैपरीत्याख्यः कटुरुष्णः कफापहृत् ।
रसे नियामकश्चैव नानाविज्ञानकारकः ॥"
इति राजनिर्घण्टः ॥

अन्या हंसपादीशब्दे द्रष्टव्या ॥ * ॥ अपि च ।

"लज्जालुः स्यात् शमीपत्रा समङ्गाञ्जलिकारिका ।
रक्तपादी नमस्कारी नाम्ना खदिरकेत्यपि ॥
लज्जालुः शीतला तिक्ता कषाया कफपित्तजित् ।
रक्तपित्तमतीसारं योनिरोगान् विनाशयेत् ॥"

अथ लज्जालुभेदः ।

"अलम्बुषा खरत्वक् च तथा मेदोगला स्मृता ।
अलम्बुषा लघुः स्वादुः क्रिमिपित्तकफापहा ॥"
इति भावप्रकाशः ॥

अन्या दुग्धिकाशब्दे द्रष्टव्या ॥

लज्जाशीलः, त्रि, (लज्जा शीलं स्वभावो यस्य ।) लज्जाविशिष्टः । तत्पर्य्यायः । अपत्रपिष्णुः २ । इत्यमरः ॥ लज्जितः ३ । इति शब्दरत्नावली ॥

लज्जितः, त्रि, (लज्जा सञ्जातास्य । लज्जा + तारकादित्वात् इतच् ।) लज्जायुक्तः । तत्पर्य्यायः । ह्रीणः २ ह्रीतः ३ । इत्यमरः ॥ (यथा, रघुः । १२ । ७५ ।

"कामं जीवति मे नाथः इति सा विजहौ शुचम् ।
प्राक् मत्वा सत्यमस्यान्तं जीवितास्मीति लज्जिता ॥")

लज्जिरी, स्त्री, लज्जालुः । इति राजनिर्घण्टः ॥

लज्या, स्त्री, लज्जा । इति शब्दरत्नावली ॥

लञ्ज, तु क भासने । इति कविकल्पद्रुमः ॥ (अदन्त-चुरा०-पर०-अक०-सेट् ।) क, लञ्जयति । भासनं दीप्तिः । इति दुर्गादासः ॥

लञ्जः, पुं, (लञ्जयति शोभते इति । लञ्ज + अच् ।) पदः । कच्छः । इति हेमचन्द्रः ॥ पुच्छः । इति जटाधरः ॥

लञ्जिका, स्त्री, (लञ्जयति शोभते इति । लञ्ज + ण्वुल् । टापि अत इत्वम् ।) वेश्या । इति हेमचन्द्रः ॥

लट, बाल्योक्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सक० च-सेट् ।) बालोऽज्ञः तस्य भावो बाल्यं व्यामोह इति यावत् । लटति लोकः शिशुः स्यात् । किञ्चिद्वदति वेत्यर्थः । इति दुर्गादासः ॥

लटः, पुं, (लटति यदृच्छया वदतीति । लट + अच् ।) प्रमादवचनम् । दोषः । इति विश्वः ॥

लटकः, पुं, (लटतीति । लट् + "क्वुन् शिल्पिसंज्ञयोरपूर्व्वस्यापि ।" उणा० २ । ३२ । इति क्वुन् ।) दुर्जनः । इत्युणादिकोषः ॥

लटपर्णं, क्ली, (लटसदृशं पर्णमस्य ।) त्वचम् । इति राजनिर्घण्टः ॥

लट्टः, पुं, दुर्जनः । इति शब्दरत्नावली ॥

लट्वः, पुं, (लटतीति । लट + "अशूप्रुषिलटीति ।" उणा० १ । १५१ । इति क्वन् ।) जातिविशेषः । नेटुया इति भाषा ॥ रागभेदः । तुरङ्गमः । इत्युणादिकोषः ॥

लट्वा, स्त्री, (लट् + क्वन् । टाप् ।) करञ्जभेदः । नाटाकरञ्जा इति भाषा । वाद्यभेदः । पक्षिविशेषः । ग्रामचटक इति ख्यातः । इति मेदिनी । वे, २२ ॥ कुसुम्भम् । इति हेमचन्द्रः ॥ भ्रमरकः । भोडरी इति ख्यातः । इत्यमरभरतौ ॥ (शिखी । इति हारावली । २५६ ॥ तूलिका । द्यूतम् । यथा,—

"लट्वा तु तूलिका ख्याता लट्वा द्यूतेऽपि दृश्यते ॥"

इति वाडिरभसौ ।" इति उणादिवृत्तौ उज्ज्वलः । १ । १५१ ॥)

लड, विलासे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) लडति बाला । इति दुर्गादासः ॥

लड, इ कि भाषणे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) इ, लण्ड्यते । कि, लण्डयति लण्डति । भाषणं कथनम् । अयं केचिन्न मन्यते । इति दुर्गादासः ॥

लड, ओ इ कि उत्क्षेपणे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) ओ, लण्डितः । अनुबन्धबलादिमृग्यवधानेऽपि निष्ठातन्न नत्वम् । अस्मात् निष्ठायामिम् न स्यादित्येके । लड् इति । इ, लण्ड्यते । कि, लण्डयति लण्डति तण्डुलं लोकः । इति दुर्गादासः ॥

लड, क उपसेवे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) उपसेव इह अत्यन्तपालनम् । क, लालयेत् पञ्चवर्षाणि पुत्त्रमिति अत्र डलयोरेकत्वाल्लत्वम् । कल्पनायामस्य प्रयोगः । इति रमानाथः । लाडयति लतां वायुः । इति दुर्गादासः ॥

लड, क ङ वीप्से । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-सेट् । क ङ, लाडयते । लाभ एव इत्यन्ये । विशेषेण आप्तुमिच्छा वीप्सा । इति दुर्गादासः ॥

लड, तु क क्षेपे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरा०-पर०-सक०-सेट् ।) लडयति । अललाडत् । इति दुर्गादासः ॥

लड, म उन्मन्थनजिह्वयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-क्वचित् पीडनादौ सक०-सेट् ।) उन्मन्थनं पीडितीभावः उत्क्षिप्तीभावश्च । लडति लता वायुना पीडिता उत्क्षिप्ता वा स्यादित्यर्थः । जिह्वा तद्विषयक्रिया । लडति जिह्वा स्पन्दनवती स्यादित्यर्थः । म, लडयति । लडयति लवङ्गसुलललयलमनिति श्रीहर्षः । पीडयतीत्यर्थः । कवाटमीमिन्द्रः किरणलहरीमुल्ललयतीति मुरारिः । उत्क्षिपतीत्यर्थः । उभयत्र डलयोरेकत्वाल्लत्वम् । केचित्तु जिह्वोन्मन्थने इति पठित्वा जिह्वाया उन्मन्थनं उत्क्षेपणमिति व्याख्याय लडति जिह्वां सर्पं इत्येवोदाहरन्ति । इति दुर्गादासः ॥

लड्हः, त्रि, मनोज्ञः । इति त्रिकाण्डशेषः ॥

लड्डुः, त्रि, दुर्ज्जनः । इति शब्दरत्नावली ॥

लड्डुकः, पुं, पिष्टकविशेषः । लाड् इति भाषा ॥ यथा । लड्डुको दुर्ज्जरो गुरुः । इति राजवल्लभः ॥ अपि च ।

"तेनैव हविषा पक्वं भवेत् चूर्णञ्च लड्डुकः ॥"
इति शब्दचन्द्रिका ॥

लण्डं, क्ली, (लण्ड्यते उत्क्षिप्यते इति । लण्ड + घञ् ।) पुरीषम् । न्याड् इति भाषा । यथा,—

"समेधमानेन स कण्ठबाहुना
निरुद्धवायुश्चरणांश्च निक्षिपन् ।
प्रस्विन्नगात्रः परिवृत्तलोचनः
पपात लण्डं विसृजन् क्षितौ व्यसुः ॥"

इति श्रीभागवते १० स्कन्धे ३७ अध्याये ८ श्लोकः ॥ लण्डं पुरीषमुत्सृजन् । इति तट्टीकायां श्रीधरस्वामी ॥

लण्डजः, त्रि, (लण्डे तदाख्यदेशे जायते इति । जन + डः ।) लण्डदेशजातः । यथा,—

"पूर्व्वाम्नाये नवशतं षडशीतिः प्रकीर्त्तिताः ।
फिरङ्गभाषया तन्त्रास्तेषां संसाधनात् भुवि ॥
अधिपा मण्डलानाञ्च संग्रामेष्वपराजिताः ।
इंरेजा नव षट् पञ्च लण्डजाश्चापि भाविनः ॥"
इति मेरुतन्त्रे २३ प्रकाशः ॥ * ॥

लण्डस्तु अधुना लण्डन् इति ख्यातः । इंरेजानां राजधानी च ॥

लत, घाते । सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) लता । इति दुर्गादासः ॥

लता, स्त्री, (लतति वेष्टयते यान्यमिति । लत + पचाद्यच् । टाप् ।) शाखादिरहिता गुडूच्यादिः । तत्पर्य्यायः । वल्ली २ प्रतति ३ । इत्यमरः ॥ वल्लिः ४ वेल्लिः ५ प्रततिः ६ । सा शाखापत्रसमायुक्ता चेत्प्रतानिनी । इति शब्दरत्नावली ॥ तत्पर्य्यायः । वीरुत् २ गुल्मिनी ३ उलपः ४ । इत्यमरः ॥ * ॥ अभार्यां वीरुधां छेदकर्त्तुर्निन्दी